International Journal of Sanskrit Research 2017; 3(6): 134-135

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 134-135
© 2017 IJSR
www.anantaajournal.com
Received: 01-09-2017
Accepted: 02-10-2017

**Vinod Kumar Jangid**
Phd, Shree Lal Bahdur Shastri Sanskrit vidyapeeth New Delhi, India

**Correspondence**
**Vinod Kumar Jangid**
Phd, Shree Lal Bahdur Shastri Sanskrit vidyapeeth New Delhi, India

# आचार्यमलयगिरी तस्य शब्दानुशासनञ्च

**Vinod Kumar Jangid**

## प्रस्तावना

कथमियं संस्कृतभाषा अनादिकालाद्यपापि विविधासु प्रतिकूलासु दशासु निरन्तरं प्रवर्तत इव ? अस्य महत्वपूर्णं कारणं वर्तते अस्याः भाषायाः परिनिष्ठितं पूर्णञ्च व्याकरणम्। शब्दानुशासनेन भाषायाः एकरूपता साधिता। अनेनैव प्राचीना सत्यपि संस्कृतभाषा सर्वथा नूतनैव प्रतीयते। अस्याः भाषायाः व्याकरणं अतिविशालं व्यापकञ्च वर्तते। संस्कृतव्याकरणस्य पाणिनिः युगपुरूषः वर्तते परन्तु पाणिनियेतर अनेके व्याकरणसम्प्रदायाः सन्ति। तेषु सम्प्रदायेषु जैन सम्प्रदाये अपि अनेके वैयाकरणाचार्याः अभवन् तेषु आचार्येषु आचार्यमलयगिरिः अन्यतमः वर्तते।

आचार्यमलयगिरेः विषये अस्माकं पार्श्वे अद्यावत् सम्यक् सुस्पष्टेतिहासिकप्रमाणानि न सन्ति अतः तेषां विषये केवलं सन्दर्भविषयेनैव अनुमानं कर्तुं शक्यते। तेषां समयस्य विषयेऽपि विवरणं न लभ्यते। केवलं जिनमण्डनगणिद्वारा विरचित कुमारपालप्रबन्धे एकं विवरणं प्राप्यते यत् आचार्य मलयगिरि आचार्य हेमचन्द्रदेवेन्द्रसूरीभ्याम् सह गौडदेशं विहाय खिल्लुरग्रामं प्रति अगच्छन् विशेषकारणात्। परन्तु तं कारणमपि स्पष्टं नास्ति। यदि इतिहासं सम्यकरूपेण पश्यामः तर्हि इयं घटनाऽपि केवलं वास्तविकतायाः परे अस्ति।

आचार्यमलयगिरि स्वशब्दानुशासने कृदन्त प्रकरणस्य तृतीये पादे एकस्मिन् सूत्रे (ख्याते दृश्ये) उदाहरणं ददाति यत् अदहत् अरातीन् कुमारपालः। अस्मिन् उदाहरणे कुमारपालस्य अभिधानमागच्छति अनेनैव वयं कथयितुं शक्नुमः यत् एतेषां आचार्याणां समयः कुमारपालस्य समये एव आसीत् अर्थात् तस्य आश्रये एव सः कार्यं करोति स्म। यदि वयं कुमारपालस्य समयस्य विषये चिन्तयामः तदा अस्य समय तु त्रयोदशशताब्याः पूर्वाद्धमेव प्राप्नुमः अस्य अनेकानि प्रमाणानि सन्ति यथा तस्य त्रयः युद्धाः प्रसिद्धाः आसन् ते च

1. शाकम्बरी विजयम्
2. चन्द्रावति विजयम्
3. कोकणदेश विजयम्

युद्धस्य अन्ते सः राजस्थानस्य अनेकेषु स्थानेषु गच्छति एवं तत्र तस्य विवरणं प्राप्यते। अतः कुमारपालस्य राज्याभिषेक विक्रम सम्वत् 1199 तमे अभवत् । एतेषां युद्धानामधारेण वयं कथयितुं शक्नुमः यत् कुमारपालस्य युद्धानाम् समय तु त्रयोदश शताब्द्याः पूर्वार्धं आसीत् तस्मिन्नेव काले आचार्यमलयगिरि स्वशब्दानुशासनस्य रचनां कृतवान्।

अतः शब्दानुशासनस्य कार्यानुसारं वयं इदं कथयितुं शक्नुमः यत् तस्य जन्मः 1188 विक्रम सम्वत् तमे सौराष्ट्र देशे अभवत्। तेन 1200 विक्रम सम्वत् तमे सन्यासी इति दीक्षां प्राप्तम्। प्रायः सप्तवर्षाणि यावत् तेन सन्यासी रूपेण जीवनयापनं कृतम् तदनन्तरं सत्यस्य आध्यात्मिकगुरोः च अन्वेषणाय सः देशान्तरं भ्रमणयित्वा जैनधर्मं स्वीकृतवान्। क्र

मलयगिरि आचार्यस्य अभिधाने 'गिरि' इति शब्दस्य विषयेऽपि सुस्पष्टता नास्ति यतोहि जैनपरम्परायां तु कस्यापि अभिधानस्य परे 'गिरि' इति शब्दं न दृश्यते अतः अनेन गिरि पदेन इदं अनुमानं कर्तुं शक्यते यत् ते जन्मकालादेव जैन नासीत्। ते वैदिकब्राह्मणः आसन् अनन्तरं तेन जैनधर्मं स्वीकृतम्। वैदिकपरम्परायामपि गृहस्थः इदृशानां शब्दानां प्रयोगं न कुर्वन्ति स्म अपितु सन्यासी एवं धारयते इदृशानि अभिधानानि।

## मलयगिरि वार्तिककारः

मलयगिरिना बाल्यकालादेव विभिन्नग्रन्थानाम् अध्ययनं कृतम् यतोहि सः बाह्मणः आसीत् । तेन तस्मिन् सप्तवर्षे सन्यासीजीवनस्य आधारभूतं ज्ञानस्य अर्जनं कृतम्। परन्तु यदा सः जैनभिक्षुः अभवत् तदा तेन

जैनदर्शनस्य विभिन्न ग्रन्थानामपि अध्ययनं कृतम्। अभयदेवसूरी महोदयेन प्रेरितं भूत्वा तेन वृतयः नवागमे लेखितम। तानि च – राजप्रसानीय, जीवाजीवाभिगम,प्रजनापना, चन्द्रप्रजनापति, सूर्यप्रजनापति, जम्बूदविपाप्रजनापति, बृहत्कल्प, अवस्यका, नन्दी। वृतयः केवलं अर्थाबोधनमेव न कुर्वन्ति अपितु तस्य विषये तार्किक बिन्दूनां प्रस्तुतीकरणमपि कुर्वन्ति। आचार्यमलयगिरि अनेकेषु स्थानेषु स्वरचितशब्दानुशासनस्य सूत्राणां प्रयोगं आगमेषु लिखितवृतीषु अकरोत्। अनेन स्पष्टं भवति यत् तेन प्रथमं शब्दानुशासनं अनन्तरं वृतीनां रचना अकरोत्। सः सूर्यप्रजानपति प्रजानपना च आगमे लिखित वृतिषु स्वशब्दानुशासनस्य नामोल्लेखमपि करोति।

**शब्दानुशासनस्य स्वरूपम्**

प्रक्रियात्मकम् इदं व्याकरणम्। अस्य व्याकरणस्य इदं वैशिष्ट्यं यदाचार्येण मलयगिरिणा व्याकरण–प्रक्रियामनुसृत्य इदं व्याकरणं प्रणीतम्। अस्य वैयाकरणाचार्यस्य कालोऽपि अत्यधिकः स्पष्टः नास्ति परन्तु कैश्चिद् उपलब्धप्रमाणैः अस्य कालः द्वाद्वशशताब्द्यां स्वीकर्तुं शक्यते। अस्मिन् व्याकरणे पंचाध्यायाः सन्ति। प्रथमाध्यायः सन्धिः इति नाम्ना प्रसिद्धः वर्तते। द्वितीयाध्यायः नामप्रकरणम् तृतीय आख्यातप्रकरणम् चतुर्थो कृदन्तप्रकरणम् अन्तिमः पंचमः च तद्धितप्रकरणं वर्तते। इदम् उल्लेखनीयं यद् व्याकरणमिदं सम्पूर्णत्वेन नोपलभ्यते। पंचमाध्यायस्य प्रथम–तृतीय–चर्तुथ–पंचम– षष्ठपादाः नोपलभ्यन्ते। मलयगिरिविरचित शब्दानुशासनं पाणिनिकृत व्याकरणात् भिन्नं वर्तते। अस्य शब्दानुशासनस्य विभाग पंचभागेषु कृतम् तेन। अस्यापि शैली सूत्रशैली वर्तते। इत्थं अस्मिन् व्याकरणे सूत्राणां संख्या निर्धारिता न सन्ति यतोहि इदं व्याकरणं सम्पूर्णत्वेन नोपलभ्यते।

**सन्दर्भग्रन्थसूची**


1. आचार्यमलयगिरिप्रणीतशब्दानुशासनम्,दलसुख मालवानीया, जयन्तीदलाल वसन्त प्रिटिंग प्रेस, 1967।
2. मीमांसक युधिष्ठिर, संस्कृत व्याकरण शास्त्र का इतिहास, सोनीपत, रामलाल कपूर ट्रस्ट, बहालगढ़, विक्रम संवत्–2057।
3. सिद्धहेमशब्दानुशासनम्, हेमचन्द्रः, सम्पा, विजयचन्द्रसूरिः विक्रम संवत 2056 अनेकान्त प्रकाशसनम्, सूरत ।
4. सत्यकाम वर्मा, संस्कृत व्याकरण का उद्भव और विकास, प्रथम संस्करण 1971, मोतीलाल बनारसीदास, दिल्ली ।